International Journal of Sanskrit Research 2018; 4(1): 152-154

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 152-154
© 2018 IJSR
www.anantaajournal.com
Received: 10-01-2018
Accepted: 16-02-2018

**डा. सुशान्तकुमारराजः**
सहाचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

**Correspondence**
**डा. सुशान्तकुमारराजः**
सहाचार्यः, साहित्यविभागः,
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
श्रीसदाशिवपरिसरः, पुरी, ओडिशा, भारत

# भावध्वनिसमीक्षणम्

**डा. सुशान्तकुमारराजः**

**प्रस्तावना**

विदितचरमेवेदं यत् सर्वप्राचीनभाषादृष्ट्या संस्कृतभाषा एव भारतीयभाषाणां जननी । पुराकाले सर्वेऽपि जनाः अनया भाषया वार्तालापम् अकुर्वन् । तथैव विद्वांशोऽपि विविधानां शास्त्राणाम् उद्भावनं, तेषां प्रचारप्रसारश्च अनया संस्कृतभाषया एव साधयामासु इति प्राचीनग्रावलोकनेनावगम्यते । त एव प्राचीनग्रन्था विविधशास्त्रसम्बलिताः सन्तः वैदिककालादारभ्य आधुनिकसमयपर्यन्तं विविधैः विद्वद्भिः प्रणीताः सम्पादिताश्च सन्ति । तानि शास्त्राणि अपि चतुर्दशविद्यारूपेण अथवा अष्टादशविद्यारूपेण प्रतिष्ठितानि सन्ति । ततोऽपि नाट्यशास्त्रम्, साहित्यशास्त्रम्, शकुनशास्त्रमिद्यादीनि नैकविधानि शास्त्रान्तराणि वर्तन्ते संस्कृतवाङ्मये पञ्चमी साहित्यविद्या इति याजावरीयम् [1] ऩति निर्णयानुसारेण साहित्यशास्त्रमपि विद्यारूपेण शास्त्ररूपेण वा अङ्गीक्रियते विद्वद्भिः । भरतमुनेः आरभ्य इदानीं पर्यन्तं विविधैः आलङ्कारिकाचार्यैः नैकविधानि काव्यशास्त्रीयपुस्तकानि विरच्य संस्कृतवाङ्मयस्य समृद्धिः कृता । अधुनाऽपि संस्कृतपण्डिता: अनया भाषया विभिन्ना: रचना: कुर्वन्ति करिष्यन्ति चेत्यत्र नास्ति सन्देहः ।

प्रायश: ख्रीष्टपूर्वे पञ्चमशतके आचार्यभरतमुनि: षट्त्रिशाध्यायविशिष्टम् अतिवृहत्तरनाट्यशास्त्रीयग्रन्थं विरचितवान् । नाट्यसम्बन्धीनि सर्वाणि अपि तत्त्वानि तस्मिन् शास्त्रे सरलतया निर्दिष्टानि सन्ति । स एव आचार्यः रससम्प्रदायस्य प्रवर्तकरूपेण परवर्तिभिः सर्वैरपि विद्वद्भिः सप्रमाणमङ्गीकृतः । रसाचार्यस्य भरतमुनेः मतानुसारेण समग्रे काव्यजगति रसं विना न कोऽपि अर्थः सार्थको भवितुमर्हति । तद्भाषया 'न हि रसादृते कश्चिदर्थः प्रवर्तते'[2] इति । रसस्य आनुसङ्गिकरूपेण रसाभासः भावः भावाभासः भावोदयः भावशान्त्यादीनां च ग्रहणं भवति । नाट्यशास्त्रस्य षष्ठाध्याये रसोत्पत्तिप्रसङ्गे भरतमुनिः रससामान्यलक्षणं निरूपयन् वक्ति –

> "विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्ति:"[3] इति ।

लोके यत् कारणरूपं तत् यदि काव्ये नाट्ये च उपयुज्यते तर्हि कारणरूपत्वं विहाय तत् विभावरूपेण नामान्तरमाप्नोति । मुनिर्भरत: अत्र प्रसङ्गे प्रतिपादयति, यत्-

> "नानाभिनयसम्बन्धाद् भावयन्ति रसानिमान् ।
> यस्मात्तस्मादमी भावा विज्ञेया नाट्ययोक्तृभि: ।।[4] इति ।

तत्र पुन: स: सुस्पष्टं प्रतिपादयन् आह - ''विभाव इति कस्मादुच्यते ? विभावो विज्ञानार्थ: । विभाव: कारणं निमित्तं हेतुरिति पर्याय:, विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इति विभाव:''[5] इति । अत्र तात्पर्यमिदं यत्, नाट्ये नटै: प्रदर्शिता: वाचिक-आङ्गिक-सात्त्विकाभिनया: सन्ति । तत्र येन विभाविता: नाम विज्ञाता: भवन्ति स: विभाव: इति बुध्यते । यथोक्तं नाट्यशास्त्रे –

> बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रया ।
> अनेन यस्मात्तेनायं विभाव इति संज्ञितः ।।[6] इति ।

विभाव: आलम्बनोद्दीपनत्वेन द्विविधो भवति । यमालम्ब्य रसोद्गम: सम्पद्यते स: आलम्बनविभाव: । नायकस्य कृते नायिका, नायिकाया: कृते नायकश्च शृङ्गारे आलम्बनविभाव: । एवं य: रसमुद्दीपयति स: उद्दीपनविभाव:। चन्द्रचन्दनादि: शृङ्गारस्य उद्दीपनविभाव: । एवं प्रकारेण हि रसान्तरेऽपि विभाव: कल्पनीय: ।

किञ्च लोके यत् कार्यरूपं तदेव नाट्ये अनुभावरूपेण व्यवह्रीयते । अनु पश्चात् अर्थात् विभावानन्तरम् यदुत्पद्यते तदनुभाव:। नाट्यशास्त्रानुसारेण अनुभावलक्षणमित्थमस्ति, यथा –

वागङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते ।
शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः॥[7] इति ।

निर्वेदग्लानिशङ्कादिरूपेण त्रयस्त्रिशंद्व्यभिचारिभावा: सन्ति । एतेषां विभावानुभावव्यभिचारिभावानां संयोगेन रत्यादिस्थायिभावा: रसरूपेण परिणमन्तीति भरतेन यदुक्तं तन्निर्विवादं मनस्तत्त्वपूर्णञ्च । संस्कृतसाहित्ये भावानां व्यभिचारिणां ध्वनित्वविषये आलङ्कारिकै: आलोचितम् । काव्यप्रकाशे आचार्यमम्मट: अस्मिन् विषये लिखति यत् देवादिविषया रतिर्भाव: प्रोक्त:, अञ्जितव्यभिचारी तथा, अञ्जितो नाम व्यञ्जित: । विभावानुभावद्वारा यदि व्यभिचारिभाव: व्यञ्जितो भवति तर्हि तत्र व्यभिचारिभावध्वनिर्भवति[8] । भरतमुनेः मतानुरोधेन तेनाऽपि त्रयस्त्रिशत्भावाः अङ्गीकृताः । ते भवन्ति –

निर्वेदग्नालिशङ्काख्यास्तथासूयामदश्रमाः ।
आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः॥
व्रीडा चपलता हर्ष आवेगो जडता तथा ।
गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
सुप्तं प्रबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः ।
त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः॥[9] इति ।

मम्मटभट्टेन एतावद् उक्त्वा भावध्वनिविचारः कृतः । वस्तुतः भावध्वनेः विशालसाम्राज्यं वर्तते । सर्वेषां रसानामपि उत्पत्तरपि भावादेव भवति । अतः भरतमुनिना अपि प्रतिपादितं यत्– ‘‘किं रसेभ्यो भावानामभिनिर्वृत्तिरुताहो भावेभ्यो रसानामिति ? केषाञ्चिन्मते परस्परसम्बन्धादेषामभिनिर्वृत्तिरिति । तन्न । कस्मात्, दृश्यते हि भावेभ्यो रसानामभिनिर्वृत्तिर्न तु रसेभ्यो भावानामभिनिर्वृत्तिरिति’’[10] । सर्वेषां प्राचीनाचार्याणां मतेन मुनि-गुरु-नृप-पुत्रादिविषया रतिः व्यभिचारिभावरूपेणाङ्गी क्रियते । परन्तु सा एव रतिः यदा कान्ताविषया भवति, तदा रत्याख्यः स्थायिभावो भवतीति मम्मटभट्टप्रमुखानां मतेन स्थिरीक्रियते ।
ततः परम् आचार्य: पण्डितराज: जगन्नाथ: स्वरसगङ्गाधरे एतस्मिन् विषये किञ्चिदधिकम् आलोचयति । तन्मतेन व्यभिचारिभावा: चतुस्त्रिंशद्भवन्ति[11] । भरत-मम्मटविश्वनाथादिभिः स्वीकृतेभ्यो भावेभ्यः स: अधिकमेकं भावं स्वीकरोति, स च गुरु-राज-पुत्रादिविषया रति: इति । भावप्रसङ्गे स: आदौ पूर्वपक्षमुत्थाप्य वदति, अथ किं नाम भावत्वम् ? यदि पूर्वपक्षे उच्यते, विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वं भावत्वम् इति, तर्हि जगन्नाथ: अत्र असहमत: सन् वदति, इदं लक्षणं रसकाव्यवाक्ये अतिव्याप्नोति, यत: रसकाव्यस्य वाक्यानि विभावानुभावेभ्य: भिन्नानि भवन्ति, परन्तु तानि रसव्यञ्जकानि । अत: रसकाव्यवाक्यमपि भवान्तर्गतं भवेत् । अत्र सरलभावेन वक्तुं शक्यते यत् यदि कश्चिद् भावस्य लक्षणप्रसङ्गे वदेद् यद् विभावानुभावेभ्य: भिन्नं सद् रसस्य व्यञ्जकं तद् भाव:[12] इति । आस्मिन् लक्षणे जगन्नाथ: अरुचिं दर्शयन् वदति ’नि:शेषच्युतचन्दनम्ठ शून्यं वासगृहम्, य: कौमारहर:, इत्यादिरसकाव्यवाक्येषु लक्षणमिदम् अतिव्याप्नोति, यतोहि एतानि रसकाव्यवाक्यानि विभावानुभावतो भिन्नानि सन्ति रसव्यञ्जकानि भवन्ति च । रसव्यञ्जकवाक्येषु रस: स्वीक्रियते न भाव:, यदि एतन्न स्वीक्रियते तर्हि रसपक्षपातिनी अलङ्कारसरणि: उच्छिन्ना स्यात् । अत: विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वमिति भावलक्षणं नोपपन्नम्[13] । पुन: यदि वादी वदेत् अर्थस्तावद्रसस्य व्यञ्जक:, रसकाव्यवाक्ये शब्दा: सन्ति । वाक्यं स्याद् योग्यताकाङ्क्षाऽऽसत्तियुक्त: पदोच्चय:, इति लक्षणात् पदोच्चय: वाक्यं स्यात् । पदोच्चयेन शब्दा इत्यवधार्यते । रसस्य व्यञ्जकस्त्वर्थ: न शब्द:। अत: शब्दप्राधान्ये वाक्ये कथं रसव्यञ्जकता स्यात् ? अत: रसकाव्यवाक्ये भावलक्षणं कथमतिव्याप्नोति ? एतस्योत्तरे जगन्नाथ: वदति, भवतु नाम अर्थ: रसस्य व्यञ्जक:, परन्तु अर्थद्वारा शब्द: अपि व्यञ्जक: भवति। एतत् प्रकाशयितुं जगन्नाथ: लिखति ’अर्थद्वारा शब्दस्यापि व्यञ्जकत्वात् । एतेन पूर्ववत् रसकाव्यवाक्ये संठटितं भावलक्षणं दूषितम्। अत्र यदि वादी पुन: वदेत् ’साक्षादर्थ: रसस्य व्यञ्जक:, परन्तु यत्रार्थद्वारा (रसव्यञ्जकशब्दे) शब्दस्य व्यञ्जकत्वं स्वीक्रियते तत्र तस्य शब्दस्य द्वारान्तर (अर्थद्वारा ) व्यञ्जकत्वात् अपि च साक्षात् व्यञ्जकत्वाभावात् रसव्यञ्जकत्वम् अस्माभि: न स्वीक्रियते, अत: रसकाव्यवाक्ये सठटितं भावलक्षणं नातिव्याप्नोति, एतस्य उत्तरे जगन्नाथ: पुन: वदति, एवं न वक्तव्यम् । द्वारान्तरव्यञ्जकत्वम् अवश्यं स्वीकर्तव्यम्, यतो हि भावस्यापि पुन: पुन: भावनाद्द्वारा रसव्यञ्जकत्वमस्ति। अपि च विभावानुभावभिन्नत्वे सति शब्दभिन्नत्वे सति रसव्यञ्जकत्वं भाव इति उच्यते चेत् तर्हि एतत् लक्षणं भावनायामपि अतिव्याप्नोति । भावना हि विभावानुभावभिन्ना सती शब्दभिन्ना सती रसव्यञ्जिकास्ति, अत: जगन्नाथेनोक्तं ’द्वारान्तरनिरपेक्षत्वेन व्यञ्जकत्वे विशेषिते त्वसम्भव: प्रसज्येत, अपि च भावस्यापि भावनाद्वारैव व्यञ्जकत्वात् भावनायामतिव्याप्त्यापत्तेश्च ।
पुन: यदि वादी वदेत् विभावानुभावभिन्नत्वे शब्दभिन्नत्वे च सति रसव्यञ्जकत्वं भाव: इति तर्हि जगन्नाथ: वदति प्रधानतया भावाभिव्यक्तिस्थले रसाभिव्यक्तिर्नास्ति । अत: लक्षणमिदमव्याप्तिदोषान्तर्गतम्। यतो हि भावध्वनिस्थले रसव्यक्ति: न स्वीक्रियते, यदि भावध्वनिस्थले रसव्यक्ति: स्वीक्रियते तर्हि तस्य रसस्य प्राधान्यं स्यात् न भावध्वने: । अत: भावध्वने: विलोप: स्यात्[14] । यदि वादी पुन: वदेत् भावस्य प्राधान्यात्तत्र भावध्वनिरस्तु रसस्तु व्यज्यमानोऽपि चमत्कारविरहात् न ध्वनिपदं व्रजेत्, तर्हि जगन्नाथ: वदति चमत्काररहितस्य रसस्याभिव्यक्ति: क्वापि नास्ति । यत्र रसाभिव्यक्तिस्तत्र तस्य चमत्काराधिक्यात् ध्वनित्वमेव, अत: भावध्वनिस्थलेऽपि रसस्य विद्यमानस्य चमत्कारित्वात् प्राधान्यात् ध्वनित्वं स्यात् न भावस्य । अत: भावध्वनिस्थले रसव्यञ्जकत्वमिति विशेषणमयथार्थम् । रसे धर्मिग्राहकत्वात् (आनन्दांशस्य विद्यमानात्) चमत्कारित्वं सर्वैरनुभूयते[15] । अत: परं जगन्नाथ: वादिमतं समूलमुत्पाटयितुं वदति, यदि प्रधानतया ध्वन्यमानभावस्थले रसाभिव्यञ्जकत्वं स्वीक्रियते तर्हि देश-काल-वयोऽवस्थादिपद्यवाक्यार्थे अतिव्याप्ति: स्यात् । यतो हि एतत् सर्वं विभावानुभावभिन्नं भवति, अपि च रसव्यञ्जकं भवति, परन्तु न केनाप्यालङ्कारिकेण देश-कालवयोऽवस्थावर्णनपद्यं भावस्थलत्वेन स्वीक्रियते ।
यदि वादी पुन: वदति, रसाभिव्यञ्जकचर्वणाविषयचित्तवृत्ति: भाव: अस्तु, तर्हि जगन्नाथ: एतदपि न स्वीकरोति । अत्र तात्पर्यं यत् रसाभिव्यञ्जिका चित्तवृत्ति: भाव इति, या चित्तवृत्ति: चर्वणा (आस्वाद) विषयीभूतास्ति। एतेन रसाभिव्यञ्जिकाया: चित्तवृत्ते: विशेषणत्वेन चर्वणाविषया इति यदुक्तं तत् भावचर्वणात: पृथक् करणाय । यतो हि चर्वणा चर्वणाया: विषय: न भवति। किञ्च यदि भावस्य लक्षणमिदमुपर्य्युक्तं भवत्वित्युच्यते, तर्हि वक्ष्यमाणपद्ये लक्षणमिदमतिव्याप्नोति, तथा हि-

’कालागुरुद्रवं सा हालाहलवद् विजानाति नितराम् ।
अपि नीलोत्पलमालां बाला व्यालावलिं किलामनुतेठ ।।[16] इति ।

अस्मिन् पद्ये कस्याश्चिद् विरहिण्या: अवस्था वर्ण्यते। विरहिणी विरहपीडया कालागुरुद्रवणं विषमिव मनुते, अपि च विरहशमनाय हृदि न्यस्तां नीलोत्पलमालां कृष्णसर्पावलिमिव कलयति। अत्र पद्ये शुद्ध: विप्रलम्भशृङ्गार: प्रधानतया ध्वन्यते । यदि रसाभिव्यञ्जिका चित्तवृत्ति: भाव इति लक्षणं स्वीक्रियते तर्हि उक्तकालागुर. इत्यादिपद्ये कालागुरुद्रवादौ विरहिण्या: यद्विषत्वादिचिन्तनं तत् विप्रलम्भस्य अनुभावत्वेन चित्तवृत्तित्वेन रसाभिव्यञ्जकचर्वणाविषयत्वेन च कल्पयितुं शक्यते । अपि च निन्दति चन्दनमिन्दुकिरणमनु विन्दति खेदमधीरम्,व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम् इत्यादि-श्रीजयदेवस्य श्रीगीतगोविन्दपद्ये मलयसमीरणे श्रीराधाया: गरलत्वकल्पनमपि विप्रलम्भस्यानुभाव:। एतदपि तस्या: चित्तवृत्तिविषयत्वेन रसाभिव्यञ्जकचर्वणाविषयत्वेन च गृह्यते। अत: अत्रापि विप्रलम्भशृङ्गार एव न भाव:। एवमपि-

आलोक्य स्मरसङ्गरे विलुलितां नीवीं श्लथं मूर्धजं
वक्षोजं नखचिह्नितं बहुतरं यत्रापि दष्टाधरम् ।
नेत्रान्तंच गताञ्जनं पदयुगं लाक्षाच्युतं सर्वथा
प्रत्यूषे नवनीतकल्पललना याता पुन: कामिनी’’॥ [17]

इत्यादौ आचार्यसूर्यमणिरथेन प्रणीते शृङ्गेरीशतकीयपद्ये पूर्वरात्रौ नायकेन सह कृता प्रात: तत् तत् चिह्नदर्शनेन स्मृता सती रतिक्रीडा चित्तवृत्तिविषयत्वं भजति । एतस्यापि रसाभिव्यञ्जकचर्वणाविषयत्वेन ग्रहणात् अत्र रसोत्पत्ति: न भावोत्पत्तिर्भवति। यदि भवता स्वीकृतं भावलक्षणं स्वीक्रियते तर्हि एतादृशानि रसस्थलानि सर्वाणि

भावान्तर्गतानि स्यु:, येन महती रसपरंपरा क्षुन्ना स्यात्। अत: भावस्य एतादृशं लक्षणं न युक्तियुक्तम्। अत:परं यदि कश्चिद् वदेत् भावलक्षणमखण्डमस्तु, यस्य लक्षणं कर्तुं न शक्यते तद् अखण्डम्, परन्तु जगन्नाथ: अत्र असहमत: सन् वदति, एतदपि न, तत्त्वे मानाभावात्, अर्थात् अस्माभि: भावस्य लक्षणं कृतमस्ति, अत: भाव: अखण्ड: इति न वक्तव्यम्। तर्हि भावस्य किं लक्षणमिति प्रश्ने जगन्नाथ: वदति-

विभावादिव्यज्यमान-हर्षाद्यन्यतमत्वं तत्त्वम् [18] इति।

अर्थात् विभावानुभावाभ्यां व्यज्यमान: हर्षादिभाव: भावध्वनिरिति, भावध्वनिस्थले केवलं विभाव: अनुभावश्च व्यञ्जकौ, न तु अन्यस्य व्यभिचारिभावस्यावश्यकता अस्ति। यदि भावध्वनिस्थले अन्यस्य व्यभिचारिण: व्यञ्जकत्वमिष्यते तर्हि प्रकृतध्वन्यमानभावापेक्षया तस्य प्राधान्यं स्यात्। वस्तुत: प्रकरणादिवशात् भावध्वनिस्थले नान्तरीयकतया यदि अन्यस्य भावस्याङ्गरूपेण प्रतीतिरस्ति तर्हि तत् न वार्यत। यथा गर्वादौ अमर्षस्य, अमर्षादौ वा गर्वस्य। सामाजिकगत: हर्षादिभाव: स्थायिभावन्यायेन ध्वन्यते, अर्थात् अनुकूलविभावादिद्वारा यथा वासनारूपेण विद्यमान: स्थायी रसरूपेण व्यक्त: भवति तथा विभावानुभावद्वारा सामाजिकहृदये विद्यमान: हर्षादिभाव: स्थिरतया व्यक्त: भवतीति केचिद् वदन्ति। अपरे केचित् रसन्यायेन तस्याभिव्यक्ति: भवतीति वदन्ति, यथा विभावदियोगेन भग्नावरणा चित् एव रसतयानुभूयते तथा आवरणमुक्त: चिद्विषय: हर्षादि: अनुकूलविभावादिभि: व्यज्यते। अपरे व्यङ्ग्ययान्तरन्यायेन भाव: व्यज्यते इति वदन्ति, अर्थात् वाच्यार्थबोधानन्तरं यथा वक्तृ-बोद्धव्यादिद्वारा वस्तु-अलङ्कारव्यङ्गयं संलक्ष्यामतया ज्ञायते तथा हर्षादिभावध्वनि: संलक्ष्यामव्यङ्ग्यतया अभिव्यज्यते न तु असंलक्ष्यव्यङ्ग्यरूपेणेति।
अनेन प्रकारेण भरतमुनेः आरभ्य पण्डितराजजगन्नाथपर्यन्तं विविधैरालङ्कारिकाचार्यैः पारम्परिकतया सिद्धान्तितः भावध्वनिः सारसंक्षेपतया प्रतिपादितः। तथापि सर्वेषामाचार्याणां मध्ये विशेषतः पण्डितराजजगन्नाथस्य मतानुसारेण भावध्वनिविषये विद्यमानः सिद्धान्तः नितरां प्रणीधानयोग्यः इति दिक्।

**सन्दर्भाः**


1. काव्यमीमांसा – पृ. 13
2. नाट्यशास्त्रम्- अध्याय- 6. पृ. 108
3. नाट्यशास्त्रम् – तत्रैव
4. नाट्यशास्त्रम् - 7/3
5. नाट्यशास्त्रम् – अध्याय- 7 पृ. 123
6. नाट्यशास्त्रम् - 7/4
7. नाट्यशास्त्रम् - 7/5
8. काव्यप्रकाशः - 4/35
9. काव्यप्रकाशः - 4/31-34
10. नाट्यशास्त्रम् – अध्याय – 6 पृ. 109
11. रसगङ्गाधरः – प्रथमाध्यायः पृ. 297
12. रसगङ्गाधरः – प्रथमाध्यायः पृ. 289
13. रसगङ्गाधरः – प्रथमाध्यायः तत्रैव।
14. रसगङ्गाधरः – प्रथमाध्यायः पृ. 290
15. रसगङ्गाधरः – प्रथमाध्यायः तत्रैव।
16. रसगङ्गाधरः – प्रथमाध्यायः पृ. 292
17. शृङ्गेरीशतकम्
18. रसगङ्गाधरः – प्रथमाध्यायः पृ. 293